## ।। अथ अष्टत्रिंशोऽध्याय: ।। Chapter-38

मांधातोवाच :- श्रीपुंजेन कथं राज्ञा राक्षिका सा निशाचरी ।।
वशीकृता बलवता तन्मे ब्रूहि तपोधन ।। १

वसिष्ट उवाच :- शृणुष्वावहितो राजन्कथा मेतां मनोहराम् ।।
गौतम: कथयामास यां म[१] गीर्वाणिसंसदि ।। २

श्रीपुंजे शासति श्रोत्रं राजन् ब्राह्मणवत्सले ।।
उत्सवा: शतश:[२] संप्रवृत्ता गृहे गृहे ।। ३

तत: सा राक्षसी दुष्टा सैंधवारण्यवासिनाम् ।।
द्विजानामवरोधने[३]श्रीमालं मोक्तुमागता[४] ।। ४

दक्षिणस्यां दिशि ततो गृहमध्या[५]द्विजन्मन: ।।
प्रगृह्य कस्यचित्कन्यां राक्षसी गतुंमुद्यता ।। ५

सा बाला रुदतीगाढं स्मरन्ती कुलदेवताम् ।।
त्राहित्राहीति सुरभिमालरित्यार्पिन्मुहु: ।। ६

इष्टा वंशस्य वै तस्या: सुरभी नाम देवता ।।
श्रीमालं[६] चासुरै कीर्णभित्वा सीमान्तमाश्रिता ।। ७

१ए हिते कथा -०-
१ ई बी द्विजेन्द्राणां
२ ई बी शतशो राजन्
३ ई बी मुक्त
घ-ई-२ मेत्
५ बी वेदीमध्याद
ई देवामध्याद्जन्मन:
६ बी ई श्रीमालं या सुरै: कीर्णं
१ ए ष्वावहितोकथा २ ए ~~शतशस्त~~ शतश:

रात्रौ पुरस्ताद् गच्छन्तीं सारिकां बालहारिणीम् ॥
बालिकार्तस्वरैर्मत्वा सुरभी तामकीलयत् ॥ ८

मुखस्तंभं गतिस्तंभमंगस्तंभं च तद्गुणात् ॥
चकार सुरभी देवी श्रुत्वा कन्यापि कस्वरान् ॥ ९

न स्थातुं च न गंतुं च राजन् शक्तातिसारिका ॥
इतस्ततो वीक्ष्यमाणा पश्यतिस्म न किंचन ॥ १०

ततः श्रीमालतः प्राप्तः श्रीपुंजः सह सैनिकैः ॥
परित्राणाय कन्यायाः श्रीमान्नाकृष्टकार्मुकः ॥
दृष्ट्वा तां राक्षसीं क्रूरां गृहीतद्विजबालिकाम् ॥ ११

पक्षणाचारमाहेदमुच्चैः कोपान् महीपतिः ॥ १२

दुष्टे चिरेण लब्धासि द्विजकन्यापहारिणि ॥
मया मुक्तः शरोयं ते शिरश्छेत्स्यति सारिके ॥ १३

इत्युक्त्वा शरसंधाने दृष्ट्वा राजानमातुरम् ॥
विहाय ब्राह्मणसुतां भीतोवाचाथ सारिका ॥ १४

न मोक्तव्यो महेषुस्ते मयि राजन् कथंचन ॥
सैंधवे? सिंधुमाराध्य प्राथिता हं द्विजाधमैः ॥ १५

-०-

१ ई सशैल पुरस्ता
२ बी ई कन्यां पिकस्वरैर्मत्वा सुरभीतामकालयात् ॥
घ-ई-२ कन्यापिकस्वैरमैन्था सुरभीतामपीडयत् ॥
५ बी नराधमैः ॥ ५ ए दुष्टेचिरेण
३ ए पश्यति
४ ए वृही

कर्तुं श्रीमालविध्वंसं तेन सर्वं कृतं मया ।।
कुरु प्रतिपणं राजन्नित्यर्थं मम किंचन् ।। १६

यथा भवामि विप्राणामहं नित्यसहायिनी ।।

राजोवाच :- कीदृक् प्रतिपण: कार्यस्त्वदर्थे वद खेचरि ।। १७

१ येन त्वं द्विजवर्याणां सहायं कुरुषे सदा ।।

सारिकोवाच :- भोजनं द्विजवर्याणां प्रदातव्यमनेकश: ।। १८

३
कन्याविवाहसंवृत्ते संबंधिभ्यांपरस्परम् ।।
तेन प्रीता भविष्यामि राजेन्द्रसपरिच्छदा ।। १९

वैवाह्यां: करिष्यामि रक्षोभ्यस्त्राण कारणम् ।।
वरपित्रा द्विजश्रेष्ठा भोक्तुमामन्त्रिता नृप ।। २०

उद्वाहवासरस्यांते द्विगुणा कन्यकापितु: ।।
न मे मृत्यु: शरे राजन् कदाचिदिह विद्यते ।। २१
परं द्विजहितायैवं समय: क्रियते मया ।।
श्रुत्वैतद्विकटे भूप: प्रोक्तं सारिकया वच: ।। २२

-o-o-

१ सी प-२ प्रजान्त: पश्चादधिक: प्रकरण समलब्ध पाठ एवं दृश्यते विवाह नसरे राजन् पूर्वं हि मम प्रीतये नशीथे तत्र कर्तव्यं रजोधूलतरामिधम् --- पूजयेत सारिकां प्रीत्यै पश्चादन्यांश्च भोजयते

२ सी - बं ब्र -डी-ई-प् ई अशेषत: ३ बी डी ई सम्बन्धिभ्या, सी ५ बी ई मन्वहम्, ६ बी ई यैषा ७ बी ई न्नृपतेरग्रेप्रोक्तं , ७ प्-ई-२ तोप्रोक्तं सारिका वच:

४ ए परिच्छदा:

एवमस्त्वति तामाह सारिकां बालहारिणिम्[1] ।।
अथ राजा मुदा युक्तो याहि याहीति पार्थिव: ।। २३

तामुवाच न सा गंतुं पुन: शक्तास्ति[2] खेचरी ।।
नाकाशे न जगत्यां च गतिस्तस्या: प्रवर्तते ।। २४

तत: स्मितमुखो राजा किमेतदिति पृष्टवान् ।।
सा प्रोवाच न जानामि कस्येदं कर्म दुष्करम् ।। २५

अव्याहतगतेर्येन मम स्तंभ: कृतो महान् ।।
वसिष्ठ उवाच :- अथ देवी समभ्येत्य प्रत्यक्षा सुरभीनृप ।। २६

श्रीपुंजमब्रवीत्तुष्टा राजानं द्विजवत्सलम् ।।
एतस्या: कुलकन्याया: कुलेऽहं देवता नृप ।। २७

राजोवाच :- अस्या आर्तस्वरंश्रुत्वा सारिकास्तंभमातनोम्[3] ।।
नमोदेवि महादेवि जगत्त्राणपरायणे ।। २८

आपद्गमस्त्वं परित्राहि मातलोकांश्च[4] मां सदा ।।
देव्युवाच :- तुष्टा तव महीपाल वरं वृणु यथारुचि ।। २९

-0-

१ बी ई सारिकां बालसारिकाम्
२ बी ई शक्नोति खेचरी सी ई शक्तेति खेचरी ३ ई महोवाचन्
३ ए-सी-बी डी-ई माकरोत् सी-ई मातनोत् ४ बी आपद्भ्यस्त्वं परित्रासि मातलोकानिमान् सदा, सी ई मातलोकनम: सदा ।।

२ ए शक्ताति

न मेऽघ दर्शिनो देवा: स्थितिरेषा सनातनी ।।
राजोवाच :- यदि तुष्टाऽसि देवेशि तदिमां मुंच सारिकाम् ।। ३०

एवमेव द्विजेन्द्राणां त्राणं कार्यं च सर्वदा ।।
देव्युवाच :- एवमस्तु महाराज यत्तेऽभिलषितं हृदि ।। ३१

य इमां च कथां लोके मद्भक्त: कीर्तयिष्यति ।।
श्रीपुंजस्य सुरभ्याश्च सारिकायाश्च संगमे ।। ३२

न तस्य प्रभविष्यंति राजन् भूतग्रहा:क्वचित् ।।
वसिष्ठ उवाच :- इत्युक्त्वांतर्हिता देवी सुरभी वंदिता द्विजै: ।। ३३

सारिका च ययौ राजन् सागरं पयसां निधिम् ।।
पूजयित्वा महादेवीं सुरभीं ब्राह्मणै: सह ।। ३४

श्रीमालमाययौ राजा गृहीत्वा द्विजकन्यकाम् ।।
सर्व: प्रमुदितो लोक: श्रीमालेऽभूद्गतज्वर: ।। ३५
हृष्ट: पुष्ट: सदोत्साही सत्क्रियाप्रवणा: सुखी ।।
तदाप्रभृति भूपाल द्विजा: श्रीमालवासिन: ।। ३६

-०-

१ वी ई अभ्यर्च्य तां महादेवीं घ -ई-२- अभ्यर्चित
२ ई पुष्ट: महो
१ ए मायर्यो २ ए श्रीमालेऽभ्दतज्वर:
३ ए वै मिलिखितं हृदि

भोजयंति [1] द्विजश्रेष्ठान् विवाहात् [2] सप्तमे दिने ।। ३७

ब्राह्मणानामनेकानाम् अशनात् सप्तवासरः ।। ३६
अनेकाशीति विख्यात: श्रीमालेऽभून्न संशय: ।।
इत्थं निशाचरी राजन् सारिका स वशीकृता ।। ३८

प्रसादेन सुरभ्या वै श्री पुंजेन महीभुजा ।।
एतच्छृणोति यो भक्त्या सारिकाख्यानमुत्तमम् ।। ३६
भूतप्रेतादिभिर्दुष्टैर्न कदाचित् स बाध्यते ।। ४०

-०-

इति श्री स्कंद पुराणे श्रीमाल माहात्म्ये सारिकोपाख्यान् नामाष्टत्रिंशोऽध्याय: ।। ३८

१ ई॰ सांजयंतिद्विज ए भोज्यंतिद्विज २ ई॰ विवाहात्सप्रमेदिन्ने